प्रारम्भाब्दः १९६४

ISSN 2348-9847

वर्षम् - ५३

वार्षिकी शोधपत्रिका

अङ्कः ५३

२०१६ - २०१७

# सुरभारती



THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

Estd. 1949

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजासयाजिरावविश्वविद्यालयः, वटोदरम्

Scanned with CamScanner

ISSN-2348 9847



# मुकुलभट्टदिशाऽभिधाविचारः

-डॉ. ललितकुमारः पटेलः*

प्राचीनतम-संस्कृतवाङ्मयवाक्यावली हृदयभाषा रसभाषा सङ्केतभाषा मनुष्यस्य। तां ज्ञातुं पदबोधयत्नेन पदशास्त्रं (व्याकरणशास्त्रं) वाक्यबोधयत्नेन वाक्यशास्त्रं (मीमांसाशस्त्रं) चाविष्कृतं नरेण मेधया साधनया तपसा श्रमेण च। पातञ्जलमहाभाष्य-जैमिनिमीमांसा-दर्शन-शबरभाष्यप्रवृत्तयः ग्रन्थाः समजायन्त शब्दार्थनित्यत्वविचार-परिप्रेक्ष्येऽपौरुषेयवेद-प्रभावात्। वेदशब्दार्थनित्यत्वविचारबाध्यत्वात् अतिविलक्षणसिद्धान्त-शब्दशक्तिविचारः समुत्पन्नः प्रत्याय्य-प्रत्यायक-भावरूपेण दार्शनिकेषु वैयाकरणेषु बौद्धेषु च। यद्यपि परस्परं ते पृथक्-पृथक् स्वसिद्धान्तान् स्वकीयपद्धत्या प्रतिपादयामासुः। परम्परायामस्यामयं शब्दार्थशक्तिविचारः साहित्यशास्त्रेऽप्यवतीर्णः। अस्ति सर्वेषु शब्देषु शक्तिः। तया शक्त्यैव शब्दः स्वाभीष्टमर्थं द्योतयति। सा शक्तिः, एका एव अथवा भिन्ना भिन्ना? शक्तेर्नामानि कानि च? इति चिन्तनमभवद्भारतीय-शब्दशक्तिविचारपरिप्रेक्ष्ये। उक्तं च भर्तृहरिणा- **"विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते। न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः।[१]"** अनेन व्याकरणशास्त्रप्रभावेन साहित्यशास्त्रे ध्वनिसिद्धान्तीयध्वन्यालोकनामके ग्रन्थे शब्दशक्ति-विचारोऽभवत्। तत्र स्वतन्त्ररूपेण अभिधा लक्षणा व्यञ्जना चेति शक्तित्रयस्यासङ्गीकारः कृतः। ततः **'पद-वाक्य-प्रमाण-परावारपारीण'** इति उपाधिना विभूषितः काश्मीरिकस्य भट्टकल्लटस्य सूनुरासीत् श्रीमुकुलभट्टः। अस्यैकमात्रं ग्रन्थो विद्यते **'अभिधावृत्तमातृका'** इति। केचन **'अभिधावृत्तिमातृका'** इत्यपि कथयन्ति। तेनैवोक्तम्-

**भट्टकल्लटपुत्रेणामुकुलेन निरूपिताः।**

**सूरिप्रबोधनायेयमभिधावृत्तमातृका ।।**[२]

अतिलघुकायेऽभिधावृत्तमातृकाभिधानेऽस्मिन् ग्रन्थे केवलं पञ्चशसंख्याका एव कारिकाः सन्ति। आसां कारिकाणां 'मातृका' इति वृत्तिरपि स्वयं मुकुलभट्टेन कृता वर्तते। मुकुलभट्टः केवलं शब्दस्याभिधावृत्तिमेव स्वीकरोति। तस्य समाधानं स्वग्रन्थशीर्षकेण

* सहायकाचार्यः, संस्कृतकोलेज, श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम् (गुज.)

१. वाक्यपदीयम्-१.५६ २. अभिधावृत्तमातृका-१५



Scanned with CamScanner

निम्नाङ्कितैर्वाक्यैश्च भवन्ति—

— शब्दस्य च मुख्येन लाक्षणिकेन वाभिधाव्यापारेण-अर्थावगतिहेतुत्वम् इति।

— मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते।

— कः पुनः मुख्यो लाक्षणिको वाभिधाव्यापारः।

— इत्येतदभिधावृत्तिं दशधाऽत्र प्रकीर्तितम्।

यथा आनन्दवर्धनः ध्वनेः **'वाच्यप्रतीयमानाख्यौ....०'** इति भेदावुभौ कृतवान् तथा मुकुलभट्टोऽपि **'मुख्यलाक्षणिकौ'** इति अर्थस्य भेदद्वयं कृत्वा शब्दव्यापारविषये विचारितवान्। शब्दस्याभिधाव्यापारो द्विविधः प्रतिपातो निरन्तरार्थविषयः सान्तरार्थनिष्ठश्च। तत्र मुख्यश्चतुर्भेदो जाति-गुण-द्रव्य-क्रियाभेदतः। लाक्षणिकश्च षड्विधः प्रोक्तः। मुकुलभट्टानुसारेणाभिधायाः भेदविशेष-स्वरूपता वर्तते लक्षणा। एवम् अभिधायाः दशभेदाः भवन्ति। मुकुलभट्टानुसारेण समेषामर्थानां ज्ञानम् अभिधया जायते। तत्र प्रथमोऽर्थः मुख्यः, इतरे च लाक्षणिकाः। प्रथमेऽर्थेऽभिधा स्वयमेव प्राप्नोति, अन्येषामर्थानामवगमनाय पूर्वार्थः पूर्वार्थाः वा सहायाः भवन्ति। अमी अर्थाः विवर्तरूपाः सन्ति। वाक्यार्थरूपः एकः एवार्थः, ब्रह्मरूपः शब्दोऽपि एकः, तथैव शब्दव्यापारोऽपि अभिधास्वरूपः एक एव।

### ★ मुकुलभट्टदिशाऽभिधा

मुकुलभट्टदिशा शब्दस्यैकैव शक्तिः अभिधा। निम्नाङ्कितैर्वाक्यैः इदं स्पष्टीभवति-

– शब्दस्य च मुख्येन लाक्षणिकेन वाभिधाव्यापारेण अर्थावगतिहेतुत्वम् इति।

– मुख्यलाक्षणिकयोरभिधाव्यापारयोऽत्र विवेकः क्रियते।

– कः पुनः मुख्यो लाक्षणिको वाभिधाव्यापारः।

– शब्दतत्त्वस्य दशविधाभिधाभिधावृत्तसम्बन्धित्वम्।

– मुख्यस्याभिधावृत्तस्य भेदाश्चत्वारः, लाक्षणिकस्य तु षडित्येवं दशप्रकारमभिधावृत्तमत्र विवेचितम्।

– मुकुलेन निरूपिता। सूरिप्रबोधनायेयमभिधावृत्तमातृका।

अयं व्यापारः द्विधा विभज्यते मुख्यः लाक्षणिकश्च। कः पुनर्मुख्यो लाक्षणिको वाभिधाव्यापारः? तत्राह—

**शब्द-व्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।**



Scanned with CamScanner

अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ।।[३]

शब्दव्यापाराद् यस्य ज्ञानं मुखमिव भवति स मुख्यो व्यापारः। किन्तु यस्य ज्ञानं शब्दव्यापारगम्यार्थपर्यालोचनया भवति सः लाक्षणिको व्यापारः। यथा **'गौरनुबन्ध्य'** इत्यत्र गोशब्दव्यापाराद् यागसाधनभूतो गोत्वलक्षणा जातिरवगम्यते। तदेवं शब्दव्यापारगम्यो मुख्योऽर्थः। मुकुलभट्टदिशा तस्मिन्नेवोदाहरणे व्यक्तेः ज्ञानं **'विशेष्यं नाभिधा गच्छेद् क्षीणशक्तिर्विशेषणे'** इति न्यायात् शब्दस्य लक्षणाव्यापारेण भवति। शब्दप्रत्यायितजातिसामर्थ्यादत्र जातेराश्रयभूता व्यक्तिराक्षिप्यते। तेनासौ लाक्षणिकी शक्तिः। रेवाप्रसादद्विवेदीमतानुसारं कारिकायाः **'अर्थावसेय'** शब्दस्य तात्पर्यं वर्तते यद्– लक्ष्यार्थज्ञाने शब्दव्यापारेण सह मुख्यार्थोऽपि कारणीभूतो भवति।[४] मुख्यार्थः केवलमभिधया प्रतीयते, किन्तु लक्ष्यार्थप्रतीतिः मुख्यार्थज्ञानपूर्वकं भवति इत्याशयः। अत एवाभिधाव्यापारोऽत्र लक्षणा– संज्ञयोच्यते मुकुलभट्टमहोदयेन। एवमयं शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरन्तरार्थविषयः सान्तरार्थनिष्ठश्च।[५] मुख्यार्थप्रतीतौ व्यवधानरहितः निरन्तरार्थविषयः। लक्ष्यार्थप्रतीतौ मुख्यार्थज्ञानव्यवधानात् द्वितीयः सान्तरार्थनिष्ठः। मुख्यार्थसहकृत-अभिधया लक्ष्यार्थप्रतीतिः इत्याशयः।

### ★ अभिधायाः दशभेदाः–

मुख्याभिधाव्यापारस्य चातुर्विध्यम्– **'तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः।[६]'** जातिज्ञापकः गुणज्ञापकः, क्रियाज्ञापकः, संज्ञाज्ञापकश्च। यथा– 'गौ शुक्ल डित्थ चलति।' लाक्षणिकाभिधाव्यापारः षड्विधः। तत्कथम्? आदौ लक्षणाया द्विप्रकारत्वम् शुद्धत्वादुपचारमिश्रत्वाच्च।[७] शुद्धाया अपि लक्षणायाः द्वैविध्यम्– क्वचित् खल्वर्थान्तरोपादानेन, क्वचित्तु अर्थान्तरलक्षणेन प्रवर्तते। यत्र स्वसिद्ध्यर्थतया वस्त्वन्तस्याक्षेपो भवति तत्रोपादानम्[८] यथा **'गौरनुबन्ध्य'** इति।

यत्र तु पूर्वोदितोपादानरूपविपर्याससंश्रयात् स्वार्थसिद्ध्यर्थतयाऽर्थान्तराक्षेपो न भवति अपि त्वर्थान्तरसिद्ध्यर्थत्वेन स्वार्थसमर्पणम् तत्र लक्षणलक्षणा।[९] यथा 'गङ्गायां घोषः' इति। एवं शुद्धा लक्षणा द्विविधा विभक्ता। एतदेव शुद्धालक्षणाविवेचनं मम्मटाचार्येण काव्यप्रकाशे यथावत् स्वीकृतम्। तत्र **'गौरनुबन्ध्यः'** तथा **पीनो देवदत्तो दिवा न**

३. अभिधावृत्तमातृका-१ ४. अभिधावृतमातृका पृ. १९

५. एवमयं मुख्यलाक्षणिकात्मविषयोपवर्णनद्वारेण शब्दस्य अभिधा-व्यापारो द्विविध प्रतिपादितः। तत्रैव-१/वृत्तिः

६. तत्रैव-२/ऐ ७. शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता। तत्रैव-२/बी

८. स्वसिद्ध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत्।– तत्रैव-३/बी ९. लक्षणं तु तद्विपर्यासतो मतम्। तत्रैव-४/ऐ



Scanned with CamScanner

भुङ्क्ते' इत्युदाहरणद्वयस्य विप्रतिपतिः प्रदर्शिता तेन। उपचारमिश्रा चतुर्विधा तत्राह–

**आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः।**

**प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः ।।**[१०]

द्विविधः उपचारः शुद्धो गौणश्च। यत्र 'मूलभूतस्य उपमानोपमेयभावस्य अभावेन उपमानसदृशगुणयोगलक्षणासम्भवात् कार्यकारणभावादिसम्बन्धात् लक्षणया वस्त्वन्तरे वस्त्वन्तरमुपचर्यते तत्र शुद्धा[११]' यथा आयुर्घृतमिति। 'यत्र मूलभूतोपमानोपमेयभावसमाश्रयेणोपमानगतगुण-सदृशगुणयोगलक्षणां पुरस्सरीकृत्योपमेयोपमानशब्दस्तदर्थश्चाध्यारोप्यते[१२]' तत्र गौणी यथा 'गौर्वाहीक' इति। 'मूलभूत' इत्यस्य तात्पर्यं सादृश्यमूलकः उपचारः इत्येव। मुकुलभट्टानुसारं–'केचित् तु उपचारे शब्दोपचारमेव मन्यन्ते, नार्थोपचारम् तदयुक्तम्, शब्दोपचारस्यार्थोपचाराविनाभावित्वात्।[१३]'

द्विविधस्योपचारस्य च प्रत्येकं द्वैविध्यम् अध्यारोपाध्यवसानाभ्याम्। तत्रोक्तम्– 'यत्राध्यारोप्यारोपविषययोर्भेदमनपह्नुत्यैव वस्त्वन्तरे वस्त्वन्तरमुपचर्यते तत्रानपह्नुतस्वरूप एव वस्त्वन्तरे वस्त्वन्तरस्याधिकस्यारोप्यमाणत्वादध्यारोपः[१४]' यथा 'आयुधृतम्' तथा 'गौर्वाहीकः' इति। तत्र क्रमेण शुद्धोपचारा सारोपा गौणोपचारा सारोपा च। 'यत्र तूपचर्यमाणविषयस्योपचर्यमाणेऽन्तर्लीनतया विवक्षिततत्वात् स्वरूपापह्नवः 'पञ्चाला' इति। गौणोपचारे तु अध्यवसानस्योदाहरणं 'राजे'ति। एवमुपचारश्चतुर्विधः प्रविभक्तः। तेन सह पूर्वोक्तौ द्वौ लक्षणाभेदौ सङ्कलय्य षट्प्रकारा लक्षणा। मम्मटाचार्येणापि 'लक्षणा तेन षड्विधा' इति प्रतिपादितम्। मुकुलभट्टस्याभिधायां लक्षणात्वम् अभिधात्वपूर्वकं समुद्भवति। एवं चतुर्विधाऽभिधा षड्विधा लक्षणा च सम्भूय दशप्रकाराऽभिधा सम्भवति। अमी दशभेदाः- १. जाति, २. गुणः, ३. क्रिया, ४. संज्ञा शब्दः, ५. शुद्धा उपादानलक्षणा, ६. शुद्धा लक्षणलक्षणा, ७. शुद्धोपचारा सारोपा, ८. गौणोपचारा सारोपा, ९. शुद्धोपचारा साध्यवसाना, १०. गौणोपचारा साध्यवसाना।

लक्ष्यार्थप्रतीतिः अभिधयैव भवति अन्यार्थसहायतया। यथा मुख्यार्थप्रतिपादने भवति तथाऽत्र शब्दः स्वतन्त्ररूपेण स्वबलेन निरपेक्षो भूत्वाऽर्थप्रतिपादको न सम्भवति। उक्तं च तत्र–

**वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात्।**

१०. तत्रैव- ४-बी, ५-ऐ
११. तत्रैव- वृत्तिः
१२. तत्रैव- वृत्तिः
१३. तत्रैव- वृत्तिः

लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः ।।[१४]

एतेषां त्रयाणां वक्त्रादीनां व्यस्तसमस्तभेदभिन्नानां देशकालावस्थावैलक्षण्यगत-समस्त-व्यस्त-भेद-संयोजितानां यः स्वभावभेदप्रपञ्चः, तत एषा षट्प्रकारा लक्षणा परामर्शकुशलैः विवेचनीया। एतादृशी लक्षणा ग्राह्या। क्वचिद् लक्षणा त्याज्याऽपि यतो हि अर्थबोधाभावात्। मुकुलभट्टानुसारं मुख्योऽर्थः द्विविधः– पदस्य प्रथमोऽर्थः तात्पर्यभूतार्थश्च। एवञ्च सम्बन्धोऽपि नैकविधः भवति। १.सामीप्यसम्बन्धः यथा गङ्गायां घोषः, इत्यत्र। २. सादृश्यसम्बन्धः यथा भ्रमर भ्रमता.....० इत्यत्र। ३. समवायसम्बन्धः यथा छत्रिणो यान्ति इत्यत्र। ४. वैपरीत्यसम्बन्धः भद्रमुख इति। ५. क्रियायोगात् लक्षणा यथा– महति समरे शत्रुघ्नस्तमिति। पूर्वोक्तानां सर्वासां लक्षणानां मूलं प्रयोजनम्। गङ्गायां घोषः इत्यत्र प्रयोजनं तटस्य गङ्गात्वैकार्थसमवेतासंविज्ञानपदपुण्यत्वमनोहरत्वादिप्रतिपादनम्। सादृश्यलक्षणायां 'भ्रमर भ्रमता...'० इत्यत्र प्रयोजनं वर्तते भ्रमरत्वपुष्पत्वैका-र्थसमवेतक्रियागुणसदृशानामसंविज्ञानपदानां क्रियागुणानां प्रतिपादनम्। समवायलक्षणायां 'छत्रिणो यान्ति' इत्यत्र छत्रशून्यानां सर्वात्मना छत्रोपेतस्वाम्यनुयायितया प्रतिपादनम् इति प्रयोजनम्। वैपरीतलक्षणायां भद्रमुख इत्यत्र लक्षणाप्रयोजनं गुप्तासत्यार्थप्रतिपत्तिः। क्रियायोगलक्षणायां 'महति समरे शत्रुघ्नस्त्वम्' इत्यत्र प्रयोजनं शत्रुघ्नशब्दाभिधेये नृपतिरूपता प्रतिपादनम्। प्रकारान्तरेण षड्विधा लक्षणा तथापि पूर्वोक्ता त्रिप्रकारा लक्षणा मुख्यार्थबाधेन मुख्यार्थसम्बन्धेन प्रयोजनेन च निष्पन्ना भवति। रेवाप्रसादद्विवेदीमहोदयमतानुसारम् इयमेव लक्षणा अभिहितान्वयवादेन अन्विताभिधानवादेन तत्समुच्चयवादेन च भवितुमर्हा।[१५]

लक्षणायां क्वचिद्वाच्यो विवक्षितः, क्वचिद् अविवक्षितो वा भवति। कुत्रचिद्वाच्यस्य अत्यन्ततिरस्कारो जायते। यथा–

१. वाच्यस्य विवक्षितता यथा उपादानलक्षणायां समवायनिबन्धनायां 'छत्रिणो यान्ति' इति। तत्रैव उपादाने सम्बन्धनिबन्धनायां 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति। क्रियायोगनिबन्धलक्षणायां शत्रुघ्नस्त्वम् इति।

२. वाच्यस्य अविवक्षितता- यथा लक्षणलक्षणायं समवायनिबन्धनायां 'छत्रिणो यान्ति'इति। तत्रैव लक्षणलक्षणायां सम्बन्धनिबन्धनायां 'गङ्गायां घोषः' इति। क्रियायोगनिबन्धनायां लक्षणायां 'पुरुषः पुरुषः' इति।

३. वाच्यस्याऽत्यन्ततिरस्कारः– तत्र सादृश्यनिबन्धना यथा- 'कान्तिलिप्तवियतो

१४. तत्रैव- ४-बी, ५-ऐ

१५. तत्रैव- कारिका - ६-बी/७-ऐ



Scanned with CamScanner

मेघाः' पयोदसुहृदां केकाश्च। वैपरीत्यनिबन्धनायां 'भद्रमुख' इति।

★ **मुकुलभट्टस्य निष्कर्षः समीक्षा च।**

१. शब्दस्यैका एव शक्तिः अभिधा इति।

२. अभिधयैव समेषामर्थानां ज्ञानं भवति।

३. तत्र प्रथमोऽर्थो मुख्यः, अन्ये सर्वेऽप्यर्थाः लाक्षणिकाः।

४. प्रथमेऽर्थेऽभिधा स्वयमेव प्राप्नोति, अन्येषामर्थानामवगमनाय पूर्वार्थः वा सहायाः भवन्ति।

५. अभिधाशब्दव्यापारस्य दश अर्थाः सम्भवन्ति अतः व्यापारोऽयमपि दशधा। अमी अर्थाः यद्यपि विवर्तरूपाः भवन्ति। वाक्यार्थरूपः एक एवार्थः, ब्रह्मरूपः शब्दोऽपि एकः तथैव शब्दव्यापारोऽपि अभिधास्वरूपः एक एव।

६. मुकुलभट्टस्य अभिधाव्यापारस्य विरामो नास्ति। अन्तिमार्थपर्यन्तमयं व्यापारः प्रवर्तते।

७. मुकुलभट्टानुसारं तृतीयार्थकल्पना नानिवार्या। व्यञ्जनायाः अवश्यकता नास्ति इत्यर्थः।

८. मुकुलभट्टदिशा लक्ष्यार्थप्रतीत्यर्थं मुखार्थबाधोऽनावश्यकः। मुख्यमर्थं विहायऽन्ये सर्वेऽर्थाः लक्ष्यार्थाः। यद्यपि ध्वनिवादिनः मम्मटादयः लक्ष्यार्थबोधे मुख्यार्थस्यानिवार्यतां जगदुः।

९. मम्मटाचार्यः शब्दशक्तिविचारपरिप्रेक्ष्ये मुकुलभट्टात् प्रभावितः। लक्षणाविचारस्तु यथावत् प्रतिपादयामास मम्मटाचार्यः अभिधाभिन्नव्यापारपूर्वकम्। पुनश्च उपादानलक्षणायाः 'गौरनुबन्ध्यः' तथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति उदाहरणद्वयस्य विप्रतिपत्तिः।

अधोलिखितशब्दैः चकार– "गौरनुबन्ध्य इत्यत्र श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते, विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिविशेषणे" इति न्यायात् – इत्युपादानलक्षणा तु नोदाहर्त्तव्या, न ह्यत्र प्रयोजनमस्ति न वा रूढिरियम्, व्यक्त्यविनाभावित्वात् तु जात्या व्यक्तिराक्षिप्यते....० 'पीनो देवदत्तो दिवा न भुङ्क्त' इत्यत्र च रात्रिभोजनं न भक्ष्यते, श्रुतार्थापत्तेरर्थापत्तैर्वा तस्या विषयत्वात्।[१६]

१०. मुकुलभट्टानुसारं प्रयोजनमपि लक्षणया बोध्यम्। मम्मटाचार्यः दृढतापूर्वकं खण्डयति

१६. तत्रैव- पृ. ५८



Scanned with CamScanner

यथा 'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् इति।'

११. ध्वनिवाद्याचार्यैः प्रतिपादितः वस्त्वलङ्कारसध्वनिरूपो त्रिरूपो ध्वनिरपि लक्षणानामकेनऽभिधाव्यापारेण ध्वन्यते। यथा 'प्राप्तश्रीः....०' इति पद्ये अलङ्कारध्वनिः न, अपि तु लक्ष्यार्थः। 'दुर्वारा मदनेषवः.......०' इत्यत्र रसध्वनिरपि लक्ष्यः।

१२. मुकुलभट्टस्य उपाधिचतुष्टयवादस्तु सैव भाषाया प्रतिपादयामास मम्मटादयः ध्वनवादिनः। एवञ्च लक्षणाकारणानि, लक्षणाभेदाः अपि यथावत् स्वीकृताः।

१३. मुकुलभट्टः आनन्दवर्धनाचार्यस्य अविवक्षितवाच्य– अत्यन्तवितरस्कृतवाच्य-अर्थान्तरसङ्क्रमितवाच्यादिशब्दानां स्वानुकूलमर्थं प्रतिपाद्य स्वतन्त्रतापूर्वकं तर्कसहितं च विवृणोत।

१४. मीमांसकानां तात्पर्यवृत्तिवत् मुकुलभट्टस्याभिधापि अन्तिमविवक्षार्थपर्यन्तं गच्छन् व्यापारो वर्तते।

१५. यथा काव्यप्रकाशस्थ-ध्वनितत्त्वस्य मूलाधारो ध्वन्यालोकः तथा काव्यप्रकाशस्थ-वृत्तिविचारस्य मूलाधारो वर्ततेऽभिधावृत्तमातृका।

**सन्दर्भग्रन्थाः :—**

१. अभिधावृत्तमातृका, भाष्यानुवादकारः– डॉ रेवाप्रसादद्विवेदी, चौखम्बाविद्याभवन-वाराणसी

२. काव्यप्रकाशः, व्याख्याकारः आचार्यः विश्वेश्वरः,- ज्ञानमण्डल-लिमिटेड, वारासणी

३. ध्वन्यालोकः - व्याख्याकारः आचार्यः विश्वेश्वरः,- ज्ञानमण्डल-लिमिटेड, वारासणी

✦✦✦✦✦✦✦✦✦✦✦✦



Scanned with CamScanner